# द्वितीयोऽध्यायः

# वर्ण्यविषयकचिन्तनम्

# द्वितीयोऽध्यायः

# वर्ण्यविषयकचिन्तनम्

प्रथमो विरामः उपनिषत्सु वैदिकसध्दिान्ताः।

द्वितीयोविरामः उपनिषद्ःतासुवर्णितसिध्दान्तनामानि।

तृतीयो विरामः ज्ञानमीमांसा(उपनिषत्सु)

चतुर्थो विरामः कर्ममीमांसा(उपनिषत्सु)

पंचमो विरामः भक्तिमीमांसा(उपनिषत्सु)

# द्वितीयोऽध्यायः

# प्रथमो विरामः

**उपनिषत्सु वैदिकसध्दिान्ताः**

उपनिषद् साहित्यं वैदिक साहित्ये श्रेष्ठतरं गण्यते। उपनिषदां ये ये विषयाः सन्ति । ते सर्वे विषयाः वेदानामेव सन्ति । उपनिषत्शब्दस्य अर्थः एव एवं भवति - यत् वेदानां रहस्यं एव उपनिषदः । उपनिषद् शबदः त्रिधातुभ्यः निष्पन्नो भवति। यथा - विशरण - गति - अवसादनं च । यस्याध्ययनेन अनर्थनां नाश॥ सम्यगथरानां विदितम् एव एतद् विदुषां अस्ति यत् चतुर्वग फल प्राप्तयर्थ हि मानवं जन्म । वेदेषु चतुर्वग फलानि वर्णितानि सन्ति। तत्र मुडकोपनिषदि अस्य विषये प्राप्यते वर्णनम्। उपनिषत् साहित्यस्य आलोडनेन यत् उपनिषदां हि सिद्धान्ताः ते सिद्धान्ताः वेदानामपि अस्ति।यतो हि वेदसयैव इदं अन्तिमं रहस्यमिति।

प्राधान्येन उपनिषदां उपदेशाः ये सन्ति तद्यथा सर्वोपनिषत्सु आख्यान रूपेण बहबो दिव्योपदेशाः समुपलभ्यन्ते ये तेऽपि दिङ्मात्र उपसथापयते । यथा :-

**कठोपनिषदि :-** प्रित्यभाव विषयकं तत्वं आख्यान रूपेण वर्णितमस्ति। तच्च नाचिकेमुपाख्यान नाम्ना प्रसिद्धमस्ति।

**कठोपनिषदि :-** यदा सर्वे प्रमुच्यन्ते ॥

तत्र मोक्षपद मुपैति यदा पुरुषः तदेवं आदि लक्षणां ब्रह्मविद्यां उपदिदेश :- तथैव ब्रह्मज्ञाने सति मोक्षपुरुषार्थः प्राप्यते। अयमेव सिद्धान्त वेदस्य।

**केनोपनिषदि :-** यत् प्राप्यते तत् सगुणनिर्गुण ब्रह्मणोः उपास्यानुपास्ययोः भेदः प्रदर्शित इयं उपनिषद सामवेदिय तवल्लकार शाखा संबंधीनि वर्तते के ने ति - आरंभशब्द मा लम्ब्य अस्य प्रादुर्भावः। अस्य अपर नाम खण्डद्वयात्मिका वर्तते।तत्र ब्रह्मणः दुर्गेयता विषये :-

१: न तत्र चक्षुर्गच्छति

२: यदि मन्यसे सुवेदेति

३: नाहं मन्य सुवेदेति ।

अत्र ब्रह्म सम्युतत्वं च प्रतिपादितम् । अस्यैव भावः अर्थववेदेति प्राप्यते।

**कठोपनिषदि :-** यजुर्वेदिय कठाः तदनन्तर गतोपनिषदि कठा एव। कठ - चर - काल्गयुगिति - तद्धित प्रत्ययसय लुक् कृते। तदनन्तर गतोपनिषद् मात्रमेवोपलभ्यते। ब्रह्मविद्योपदेशान्चकार ।

ततो ब्रह्मोप --------- मन्त्र।

**प्रश्नोपनिषदि** :- अथर्ववेदिय पिपप्लाद शाखान्तर गता वर्तते। तत्र प्रश्नोत्तर प्रधानमिति कृत्वा प्रतिपाद्य विषयः विवर्णितः। तत्र षट् प्रश्नाः अत्र यथा क्रमम प्रजापतेः सकाशात् प्रकृति प्राणयोः सृष्टिं इन्द्रियान्तरापेक्षया प्राणानां प्राधान्यम्। प्राणादिनाम स्वरूप विभागैा स्वप्नसुषुप्ति ॐकारस्य ध्यानम् षोडशकला चाधिकृत्य मनुषयस्य प्रवृताः। तत्र षट्सु प्रश्नेषु आदिमः प्रश्नः जगतः कारण विज्ञानार्थं अवतारीतः विज्ञातेहि कारणे कार्यं सुतरां विज्ञातम् भवति। साधनेषु सत्सु एव सिद्धिः सम्भवति । न तेषु असत्सु अस्यैव प्रश्नस्य वेदे सन्दर्भः प्राप्यते। यथा :-

१ - एष हि दृष्टाः स्पृष्टा श्रोता - -- ९।४॥

एतदेव वर्णनम् वेदेषु उपलभ्यते।

उपनिषदः अति मनोहराः संवाद रूपेण वर्णनपराः सन्ति। एतरैय उपनिषदः पंचम अध्यायस्य द्वितीये ब्राह्मणे देव मनुष्यासुरान् स्वपुत्रान् प्रति प्रजापतेः उपदेशः।

वस्तुतसतु मनुष्याः एव उत्तमै गुणैः सम्पन्नाः देवाः ते एब हिंसादि परा असुराः लोभ प्रधानाः मनुष्याश्च । मनुष्याः एव आदानतत्वादि दोषत्रय मपेक्ष्य देवादिसंज्ञां लभन्ते।

एवं सत्त्वरजस्तमांसि अनुसंधानय ते तद् तद् भाजो भवन्ति। तस्मात् मनुष्यैः पूर्वोक्त तत्त्वत्रयम् दकारोप लक्षणम् अनुष्ठेयम् इति ॥

छान्दोग्योपनिषदि बृहदारण्योपनिषदि च ब्रह्मविद्यायाः विषयाः प्राप्यन्ते । यथा - ॐमित्येक्षर - ॥[1] अत्र ॐकारस्य विस्तृता व्याख्या प्राप्यते । मधुनाडिअमृतोपासना - ब्रह्मणश्च वर्णनम् - उपलभ्यते तत्रैव सत्यकाम जाबालयोः प्रख्याता कथांकिता वर्तते।

**श्वेताश्वतरोपनिषदि -** अपि ब्रह्मविद्या उपलभ्यते इयमुपनिषद् कृष्णयजुर्वेदस्य अत्र श्वेताश्वतर नाम्ना जेगीयते इति केचित् साम्प्रदायिकाः कथयन्ति। परं अन्ये विप्रतिपद्यमानाः सन्ति। अस्याः प्रसिद्धो मन्त्राः द्वैत सिद्धान्त प्रतिपादकः अस्ति। अजामेकां लोहित ------ ॥[2] अपि च। द्वा सुपर्णा ---- ॥[3] इत्यादि रूपेण सांख्य सिद्धान्ता नाम सम्पुष्टिर्विहितेति ॥

---

**१-** छान्दोग्योपनिषदि

**२-** श्वेताश्वतरोपनिषदि **३-** श्वेताश्वतरोपनिषदि

प्रायः सर्वेषामेव सम्प्रदायाचार्याणाम् उपनिषतसु टीका समुपलभ्यन्ते । यस्य सम्प्रदायस्य उपनिषत्सु टीका नास्ति स सम्प्रदायः अबद्धमूलः इव दृश्यते। तत्र जनाः बद्धश्रद्धाकः भवन्ति।

अनेन प्रकारेण उपनिषदां समेषां सम्प्रदायानाम् मूल भित्तिरस्ति। आसां ये सिद्धानताः ते साक्षात्वैदिकाः एव सन्ति । यतेहि - एतत् साहित्यं ज्ञान प्रकाशकं शान्तिप्रदं मानव संस्कृतेः आदि जननि चेति बहुभिः पाश्चात्य विद्वद्भिः उद्धोषितम्। विश्व तत्त्व ज्ञानस्य आदिमं श्रोतः उपनिषतमहासरितः एव प्रवाहितं प्रतीयते। एतदपि कथयितं शक्यते यत् मनुष्याणां शान्ति सौख्यकारकं वाङ्मयमिति। अस्य ज्ञानस्य श्रवण मनन निदिध्यासेनैव उपलब्धिर्ज्ञेया इति नान्यथा।

वेदेषु सर्वं निहितं वतर्ते । यथा - वेदेत्रित्वादः - ईश्वरः जीवः प्रकृतिश्चेति। वैदिक धर्मः ऋग्वेदे वर्णितः अस्ति ऋचो अक्षरे परम व्योमन् इति। वेदेषु विधि निषेध रूपेण नियमाः प्राप्ताः भवन्ति।ऋग्वेदस्य दशम मण्डलस्य सप्ताशीतेतमे सूक्ते मांसभक्षण निषेधः वर्णितः । अयमेव सिद्धान्तः उपनिषदां वेदेषु गम्यागम्योपदेशः कृतः।

वेदस्य सिद्धान्तत्वेन ये नियमाः प्रतिपादिताः ते एव उपनिषत्सु प्राप्यन्ते - यथा मोक्षानन्दः पुनर्जन्मविषयः त्रिदेश सिद्धान्तः अलंकारोपदेशः सामाजिक व्यवस्था च इत्यादि विषयेषु वेदनां उपदेशः मन्त्राश्च प्राप्यन्ते।

अक्षण्वन्तः कर्णवनतः ॥[1]

संगच्छधवं संवदध्वं ॥[2]

ऋचेनो धेनि ब्राह्मणे हि ॥[3]

---

१ः ऋग्वेद

२ः ऋग्वेद

३ः यजुर्वेदः १८ ॥४८

# द्वितीयो विरामः

## प्रमुखउपनिषदः तासुवर्णितसिद्धान्तनामानि

भारतीय दर्शन सम्प्रदाये अनेकाः उपनिषदा स्वीक्रियन्ते । अपि च शताधिकाः सन्ति। तथापि याः प्रमुखा॥ सन्ति तासामुपरि आचार्याणां भाष्याणि प्राप्यन्ते। आचार्यैंहि शांकरादिभिः एकादशोपनिषदः एव स्वीक्रिताः एव तासां उपनिषदां वेदोधारितानाम् सिद्धान्त वर्णन मत्र प्रस्तुयते।

ऋग्वेदस्य संबंधिनाम उपनिषदां सिद्धान्त वर्णनम्।

यजुर्वेदस्य संबंधिनाम उपनिषदां सिद्धान्त वर्णनम्।

वैदिकवांगमये उपनिषदां वैशिष्ट्यं अतिशयेन दरीदृश्यते। उपनिषदां संख्या बहृव्यः। विंशतित्युत्तरशततद्वयम् (220)। उपनिषदां नामानि मुक्तिकोपनिषदि अष्टोत्तरशतम् वर्तते।

निर्णयसागर मुद्रणतः मूलरूपेण प्रकाशितः वर्तते।

एतदरिक्तं अडियाार लाइब्रेरी मद्रासतः प्रकाशित उपनिषदां एका संग्रहः वर्तते यो संग्रहः अनेकेषु भागेषु विभक्तः अस्ति । तत्र एकोनाशीतित्युत्तरशतमेकं (179) उपनिषदां नामानि सन्ति।

गुजराती प्रिनिटंगप्रेस मुम्बई तः प्रकाशित उपनिषद् वाक्य महाकोशे त्रयोविंशतित्युत्तरशतत्द्वयम् (223) उपनिषद नामानि प्राप्तानि भवन्ति।

अत्र अकारादिक्रमेण उपनिषदनामानि प्रस्तूयन्ते --

1.अक्षमालोपनिषद्　　2. अक्षि-उपनिषद्

3. अथर्वशिखोपनिषद्　　4. अथर्वशिर उपनिषद्

5. अद्वयतारकोपनिषद्　　6. अद्वैतोपनिषद्

7. अद्वैतभावनोपनिषद्　　8. अध्यात्मोपनिषद्

9. अनुभवसारोपनिषद्　　10. अन्नपूर्णोपनिषद्

11. अमनस्कोपनिषद्　　12. अमृतनादोपनिषद्

13. अमृतबिन्दूपनिषद्　　14. अरुणोपनिषद्

15. अल्लोपनिषद्

16. अवधूतोपनिषद् ( वाक्यात्मकं एवं पद्यात्मकं)

17. अवधूतोपनिषद् ( पद्यात्मकं)

18. अव्यक्तोपनिषद्　　19. आचमनोपनिषद्

20. आत्मपूजोपनिषद्

21. आत्मप्रबोधोपनिषद् ( आत्मबोधोपनिषद्)

22. आचमनोपनिष ( वाक्यात्मकं)

23. आत्मोपनिषद् ( पद्यात्मकं)

24. आथर्वणाद्वितीयोपनिषद् (वाक्यात्मं एवं मन्त्रात्मकं)

25. आयुर्वेदोपनिषद्

26. आरुणिकोपनिष ( आरुणेय्युपनिषद्)

27. आर्षेयोननिषद्　　28. आश्रमोपनिषद्

29. इतिहासोपनिषद् (वाक्यात्मक एवं पद्यात्मक)

30. इतिहासोपनिषद् उपनिषत्स्तुति

(शिवरहस्यान्तर्गत अभी तक अनुपलब्ध)

31. ऊर्ध्वपुण्ड्रपोनिषद् (वाक्यात्मक एवं पद्यात्मक)

32. एकाक्षरोपनिषद्

33. ऐतरेयोपनिषद् (अध्यात्मक)

34. ऐतरेयोपनिषद् (खण्डात्मक)

35. ऐतरेयोपनिषद् (अध्यात्मक)

36. कठोपनिषद् ( कण्ठोपनिषद्)

37. कठोपनिषद्

38. कठश्रुत्युपनिषद्

39. कलिसंतरणोपनिषद् ( हरिनामोपनिषद् )

40. कात्यायनोपनिषद्

41. कामराजकीलितोद्धारोपनिषद्

42. कालाग्निरुद्रोपनिषद्

43. कालिकोपनिषद्

44. कालीमेधादीक्षितोपनिषद्

45. कुण्डिकोपनिषद्

46. कृष्णोपनिषद्

47. केनोपनिषद्

48. कैवल्योपनिषद्

49. कौलोपनिषद्

50. कौषीतकिब्राह्मणोनिषद्

51. क्षुरिकोपनिषद्

52. गणपत्यथर्वशीर्षोपनिषद्

53. गणेशपूर्वतापिन्युपनिषद् (वरदापूर्वतापिन्युपनिषद्)

54. गणेशोत्तरतापिन्युपनिषद् (वरदोत्तरतापिन्युपनिषद्)

55. गर्भोपनिषद् 56. गान्धर्वोपनिषद्

57. गायत्र्युपनिषद् 58. गायत्रीरहस्योपनिषद्

59. गारुणोपनिषद् ( वाक्यात्मक एवं मन्त्रात्मक)

60. गुह्यकाल्युपनिषद् 61. गुह्यषोडान्यासोपनिषद्

62. गोपालपूर्वतापिन्युपनिषद्

63. गोपालोत्तरतापिन्युपनिषद्

64. गोपीचन्दनोपनिषद्

65. चतुर्वेदोपनिषद्

66. चाक्षुषोपनिषद् ( चक्षुरुपनिषद्, चक्षुरोगोपनिषद्)

67. चित्युपनिषद् 68. छागलेयोपनिषद्

69. छान्दोग्योपनिषद् 70. जाबालदर्शनोपनिषद्

71. जाबालोपनिषद् 72. जाबाल्युपनिषद्

73. तारसारोपनिषद् 74. तारोपनिषद्

75. तुरीयातीतोपनिषद् (तीतावधूतो.)

76. तुरीयोपनिषद् 77. तुलस्युपनिषद्

78. तेजोबिन्दूपनिषद् 79. तैत्तिरीयेपनिषद्

80. त्रिपाद्विभूतिमहानारायणोपनिषद्

81. त्रिपुरातापिन्युपनिषद् 82. त्रिपुरोपनिषद्

83. त्रिपुरोपनिषद् 84. त्रिशिखिब्राह्मणोपनिषद्

85. त्रिसुपर्णोपनिषद् 86. दक्षिणामूर्त्युपनिषद्

87. दत्तात्रेयोपनिषद्  88. दत्तोपनिषद्

89. दुर्वासोपनिषद्

90. (1) देव्युनिषद् (पद्यात्मक एवं मन्त्रात्मक)

(2) देव्युपनिषद् (शिवरहस्यान्तर्गत- अनुपलब्ध)

91. द्वयोपनिषद्  92. ध्यानबिन्दूपनिषदष्श्ष्ष्श

93. नादबिन्दूपनिषद्  94. नारदपरिव्राजकोपनिषद्

95. नारदोपनिषद्  96.नारायणपूर्वतापिन्युपनिषद्

97. नारायणोत्तरतापिन्युपनिषद्

98. नारायणोपनिषद् (नारायणाथर्वशीर्ष)

99. निरालम्बोपनिषद्  100. निरुक्तोपनिषद्

101. निर्वाणोपनिषद्  102. नीलरुद्रोनिषद्

103. नृसिंहपूर्वतापिन्युपनिषद्

104. नृसिंहषट्चक्रोपनिषद्

105. नृसिंहोत्तरतापिन्युपनिषद्

106. पञ्चब्रह्मोपनिषद्  107. परब्रह्मोपनिषद्

108. परमहंसपरिव्राजकोपनिषद्

109. परमहंसोपनिषद्  110. पारमात्मिकोपनिषद्

111. पारायणोपनिषद्  112. पाशुपतब्रह्मोपनिषद्

113. पिण्डोपनिषद्  114. पीताम्बरोपनिषद्

115. पुरुषसूक्तोपनिषद्  116. पैङ्गलोपनिषद्

117. प्रणवोपनिषद् (पद्यात्मक)

118. प्रणवोपनिषद्   (वाक्यात्मक)

119. प्रश्नोपनिषद्   120. प्राणाग्निहोत्रोपनिषद्

121. बटुकोपनिषद् (वटुकोपनिषद् )

122. बह्वृचोपनिषद्   123. बाष्कलमन्त्रोपनिषद्

124. विल्वोपनिषद् (पद्यात्मक)

125. विल्वोपनिषद् (वाक्यात्मक)

126. बृहज्जाबालोपनिषद्   127. बृहदारण्यकोपनिषद्

128. ब्रह्मविद्योपनिषद्   129. ब्रह्मोपनिषद्

130. भगवद्गीतोपनिषद्   131. भवसंतरणोपनिषद्

132. भस्मजाबालोपनिषद्

133. भावनोपनिषद् (कपिलोपनिषद् )

134. भिक्षुकोपनिषद्   135. मठाम्नायोपनिषद्

136. मण्डलब्राह्मणोपनिषद्

137. मन्त्रिकोपनिषद् (चूलिकोपनिषद् )

138. मल्लायुपनिषद्

139. महानारायणोपनिषद्

(बृहन्नारायाणेपनिषद् उत्तर नारायणोपनिषद्

140. महावाक्योपनिषद्   141. महोपनिषद्

142. माण्डूक्योपनिषद्

143. माण्डूक्योपनिषत्कारिका

क. आगम

ख. अलातशान्ति

ग. वैतथ्य

घ. अद्वैत

144. मुक्तिकोपनिषद्

145. मुण्डकोपनिषद्

146. मुद्गलोपनिषद्

147. मृत्युलांगूलोपनिषद्

148. मैत्रायण्युपनिषद्

149. मैत्रेय्युपनिषद्

150. यज्ञोपवीतोपनिषद्

151. याज्ञवल्क्योपनिषद्

152. योगकुण्डल्योपनिषद्

153. योगचूड़ामण्युपनिषद्

154. (1) योगतत्वोपनिषद्

155. (2) योगतत्त्वोपनिषद्

156. योगराजोपनिषद्

157. योगशिखोपनिषद्

158. योगोपनिषद्

159. राजश्यामलरहस्योपनिषद्

160. राधिकोपनिषद् (वाक्यात्मकं)

161. राधोपनिषद् ( प्राठाठात्मक)

162. रामपूर्वतापिन्युपनिषद्

163. रामरहस्योपनिषद्

164. रामोत्तरतापिन्युपनिषद्

165. रुद्रहृदयोपनिषद्
166. रुद्राक्षजाबालोपनिषद्
167. रुद्रोपनिषद्
168. लक्ष्म्युपनिषद्
169. लाङ्गलोपनिषद्
170. लिङ्गोपनिषद्
171. वज्रपञ्जरोपनिषद्
172. वज्रसूचिकोपनिषद्
173. वनदुर्गोपनिषद्
174. वराहोपनिषद्
175. वासुदेवोपनिषद्
176. विश्रामोपनिषद्
177. विष्णुहृदयोपनिषद्
178. शरभोपनिषद्
179. शाट्यायनीयोपनिषद्
180. शाण्डिल्योपनिषद्
181. शारीरिकोपनिषद्
182. (1) शिवशंकल्पोनिषद्
183. (2) शिवशंकल्पोनिषद्
184. शिवोपनिषद्
185. शुकरहस्योपनिषद्
186. शौनकोपनिषद्
187. श्यामोपनिषद्
188. श्रीकृष्णपुरुषोत्तमसिद्धान्तोपनिषद्
189. श्रीचक्रोपनिषद्
190. श्रीविद्यातारकोपनिषद्
191. श्रीसूक्तम्
192. श्वेताश्वेतरोपनिषद्
193. षोढोपनिषद्
194. सङ्कर्षणोपनिषद्
195. सदानन्दोपनिषद्
196. संध्योपनिषद्
197. संन्यासोपनिषद् (आध्यात्मक)
198. संन्यासोपनिषद् (वाक्यात्मक)
199. सरस्वतीरहस्योपनिषद्

200. सर्वसारोपनिषद् (सर्वोप.)

201. स. ह. वै. उपनिषद्

202. संहितोपनिषद्

203. सामरहस्योपनिषद्

204. सावित्र्युपनिषद्

205. सिद्धान्तविट्ठलोपनिषद्

206. सिद्धान्तशिखोपनिषद्

207. सिद्धान्तसारोपनिषद्

208. सीतोपनिषद्

209. सुदर्शनोपनिषद्

210. सुबालोपनिषद्

211. सुमुख्यपनिषद्

212. सूर्यतापिन्युपनिषद्

213. सूर्योपनिषद्

214. सौभाग्यलक्ष्म्युपनिषद्

215. स्कन्दोपनिषद्

216. स्वसंवेद्योपनिषद्

217. हयग्रीवोपनिषद्

218. हंसषोढोपनिषद्

219. हंसोपनिषद्

220. हेरम्बोपनिषद्

एतासु उपनिषत्सु प्रधानोपनिषदः दश एव मन्यन्ते --
यथा --

1. ईशोपनिषद्
2. कठोपनिषद्
3. केनोपनिषद्
4. मुण्डकोपनिषद्
5. छान्दोग्योपनिषद्
6. प्रश्नोपनिषद्

7.  बृहदारण्यकोपनिषद्

8.  माण्डूक्योपनिषद्

9.  ऐतरीयोपनिषद्

10.  श्वेतात्तरोपनिषद्

आसाम् उपनिषदां श्रीमद्भि: शंकराचार्यै: भाष्यं कृतं इति तदनुसारेणनैव अन्यैराचार्यै: ( रामानुजाचार्य - मध्वाचार्य - वल्लभाचार्य - रामानन्दाचार्य ) अपि प्रस्थानत्रयैयाम् भाष्यं विरचितं इति। तर्हि एताषु प्रधन उपनिषत्सु सिद्धानत वर्णनम् किमऽस्ति तदत्र प्रसतूयन्ते --

**उपनिषदांसिद्धान्त: ---**

उपनिषदो हि वेदानां सारांशरूपेण शीर्षाणि उच्यन्ते। सामान्येन चतुर्वेदानां सम्बद्धा: सर्वाउपनिषदा: सन्ति। तासु अपि 10 प्रसिद्धा: सन्ति।

अत्र संक्षेपेण उपनिषदां सिद्धान्त: उपस्थाप्यते। ''विशेषेण जीवो जगदीश्वरश्चोपनिषदां प्रधानविषया:। उपनिषदां संख्या नैवाधुनावाऽपि निश्चिता। सामान्येन उपनिषदां संख्या नैवाधुनाऽपि निश्चिता। सामान्येन ईशादिविंशोत्तरशतोपनिषदो योगाधष्टतरोत्तरषष्ट उपनिषद इति कृत्वा। अष्टाशीत्युत्तरैकशतसंख्यका उपनिषदो मुदिता दृश्यन्ते। तासु ऋग्वेदसंम्बद्धा: ऐतरेयाद्यादश, शुक्लयर्जुवेदासम्बद्धा ईशाद्या एकोनविंशति, कृष्णयजुर्वेदेसम्बद्धा, तैत्तिरीयाद्या: द्वात्रिंशत, सामवेदासम्बद्धा: छान्दोग्याद्या षोडश, अथर्ववेदसमबद्धा: कठाद्या एकात्रिंशादिति प्राधान्येन अष्टोत्तरशतमुपनिषद:।

तत्रापि कतिचन पद्यात्मिका, कतिचन गद्यात्मिका, कतिचन उभयात्मिका सन्ति। अत्र समासेन उपनिषदां सिद्धान्तविषयादीनाम् उल्लेखः क्रियते।

**ईशोपनिषदतत्विषयसिद्धान्तः ---**

शुक्लयजुर्वेदस्य मध्यांदीनि शाखासम्बद्धेयम् तच्च चत्वारिंशत अध्याय गता। अस्य विषयः ज्ञानकर्मणोः समन्वयः। साधिता, तत्र निष्काम् कर्मस्यासन्देशः विद्याविद्ययोः भेदः प्रदर्शनपूर्वकं अध्यात्मविद्यायां निरूपणं वर्तते। यदि कश्चित् जीवनोपभुक्तं इचछति तदा स कर्म कुर्यात इति सन्देशः।

**केनोपनिषदतत्विषयसिद्धान्तः ---**

सामवेदस्य तवलकारशाखायाः इयम् उपनिषदः। केन प्रश्नपूर्वकं आरब्धात् केनोपनिषद् इति नाम्। अस्य विषयः सर्वशक्तिमतवस्य ब्रह्मणः प्रतिपादनं जीवातमनः परमात्मनसः एव इति सिद्धान्तः। सामवेदरूपेण वर्णनं अस्ति।

**कठोपनिषदतत्विषयसिद्धान्तः ---**

कृष्णयजुर्वेदस्य कठशाखा सम्बद्धाः द्वौ अध्यायौ प्रत्याध्यायं त्रिस्रो वल्पश्च वर्तन्ते। प्रसिद्ध नसिकेतोपाख्यानं अत्रैव वर्तते। संवादरूपेण परमातमनः रहस्यामयतत्वं प्रदर्शितम् इति। काव्यात्मकसंघटनयोः उतकृष्टतमं दार्शनिक विषयस्य प्रतिपादनं अस्य वैशिष्ट्यम्। निष्काम भावस्य अस्याः प्रतिपाद्य विषयरूपेण उल्लेखनीयाः।

**प्रश्नोपनिषदतत्विषयसिद्धान्तः ---**

अथर्ववेदस्य इयं पिप्पलादशाखाा समबद्धाः। प्रश्नोत्तर- रूपेण विषयप्रतिपादनं अस्ति। अत्र ओंकारस्योपासना, आध्यात्मिक दृष्ट्या उपासना विधिः, ब्रह्मेव जगतः अधिष्ठात्रीदेवता इत्यादि विषयः सिद्धान्तस्य वर्तते।

**मुण्डकोपनिषदतत्विषयसिद्धान्तः ---**

इयमपि अथर्ववेदस्य शौनकशाखा सम्बद्धाः मुण्डक-नामकत्रिषुविभागेषु विभक्तः। परापराविद्याप्रतिपादनं अस्य वैशिष्ट्यं।

**माण्डूक्योपनिषदतत्विषयसिद्धान्तः ---**

अस्यां द्वादशवाकयात्मिका गद्यरूपेण ओंकारस्यव्याख्या वर्तते। जागृत-स्वप्न-सुषुप्त-तुरीयावस्थादीनिनाम् चैतनस्य च आत्मनः वैश्वानर-तैजस-प्राज्ञशिव इति प्रकारनिरूपणम् मुख्यविषयः वर्तते।

**तैत्तरीयोपनिषदतत्विषयसिद्धान्तः ---**

तैत्तरीयशाखायां इयं खण्डत्रयं वर्तते। तत्रापि शिक्षावल्ली - ब्रह्मानन्दवल्ली - भृगुवल्ली च इत्याख्येषु निबद्धा वर्तते।

**ऐत्तरीयोपनिषदतत्विषयसिद्धान्तः ---**

ऋग्वेदस्य इयं वर्तते। त्रिषु अध्यायेषु विभक्तः अस्ति। गद्यात्मिका च। अत्रापि चैतन्य तत्वनिरूपणं, अद्वैततत्व मीमांसा, पुनर्जन्म विवेचनम् च अस्य वैशिष्ट्यं वर्तते।

**छान्दोग्योपनिषदतत्विषयसिद्धान्तः ---**

सामवेदस्य इयं वर्तते। अत्र षडाध्यायाः सन्ति। प्रतिअध्याये अनेकानिखण्डानि सन्ति। प्रतिपादनं वैशिष्ट्यं वर्तते। परब्रह्मणः विविध

प्रकारेण प्रतीकोपासना:, अनेक विद्याविद्यानां निरूपणं ओंकारस्य गूढ़रहस्यं च अस्या: मुख्य विषया: सिद्धान्तश्च।

**बृहदारण्यकोपनिषदतत्विषयसिद्धान्त:** ---

शुक्लयजुर्वेदस्य इयं उपनिषद: अत्र षडाध्याया: सन्ति। प्रत्येक अध्याय: ब्राह्मणेषु विभक्त:। अस्या: ब्राह्मण: सार्वफलं चातुवर्ण्य सृष्टि: अन्नोत्पत्ति:, मधुविद्या उपदेश: आत्मनो विविधरूपाणां वर्णनं, ब्रह्मात्मनो शिक्षा इतयादया: अस्या: विषया: सन्ति।

**श्वेतात्तरोपनिषदतत्विषयसिद्धान्त:** ---

अत्र षडाध्याया: सन्ति। रुद्रमाहत्यमम् अत्र विद्यते। परमातमन: प्रतिपादनं योगशैव - सिद्धान्त - सांख्ययोगादि विवेचनं, गुरुभक्ति महेश्वरर्णनं च मुख्य विषया: योगशास्त्रादीनाम् अपि वर्णनं अत्र उपलभ्यते।

अनेन प्रकारेण उपनिषदां सिद्धान्त: विषयाश्च प्राप्यन्ते। प्राधान्येन अभ्युदय फलकस्य कामोपासना विज्ञानसाधनस्य भगवतपरब्रह्मण: वर्णनं धर्मार्थिकाम रूपत्रिवर्गस्य उपदेश: मोक्षसाधनिका: च सन्ति। केचन केवलाद्वैत्य प्रतिपादिका: उपनिषद: स्थापयन्ति ये के विशिष्टाद्वैत विधायिका उपगच्छन्ति। अपरे च शुद्धाद्वैतपरा इति व्यवहरन्ति। सर्वा उपनिषद: वेदमूला: सन्ति। आसाम् उपनिषदां कर्मज्ञानोपासनानां उपदेश: वर्तते। तत्र प्रधानत: कर्मकाण्डपराणां धर्मज्ञान साधनीभूतानां ब्रह्मकाण्डपराणां उपनिषदां च पराविद्यात्वं इति विवेक:।

उपनिषत्सु द्वैताद्वैतो उभौ पक्षौ प्रतिपादितौ दृश्यते। यथा शंकराचार्येण अद्वैतमेव पल्लवितं, रामानन्दाचार्येण-विशिष्टाद्वैतवादं,

निम्बार्काचार्येण - द्वैताद्वैतवादं, मध्वाचार्येण -द्वैतवादः, वल्लभाचार्येण च विशिष्टाद्वैतवादं व्याख्यातः। उपनिषदां सिद्धान्तं प्रतिपाद्यविषयत्वेन उन्नयते इति।

## तृतीयो विरामः

# ज्ञान-मीमांसा

पुरुषः परमात्मा तु यदतोऽन्ययदसच्च तत्। एवं श्रुतिस्मृतीतिहासादिषु ज्ञानस्यैव मोक्षसाधनत्वावगमाद्युज्यत एवोपनिषदारम्भः। किंचोपनिषत्समा - ख्यैव ज्ञानस्यैव परमपुरुषार्थ साधनत्वमवगम्यते। तथा हि:- उपनिषदित्युपनिपूर्वस्य सदेर्विशरणगत्यवसादबार्थस्य रूपमाचक्षते। उपनिषच्छब्देन व्याचिख्यासितग्रन्थप्रतिपाद्य वस्तुविषया विद्योच्यते। तादर्थ्याद्ग्रन्थोऽप्युपनिषत्। ये मुमुक्षवो दृष्टानुश्रविकविषयवितृष्णाः। सन्त उपनिषच्दब्दितविद्यां तन्निष्ठतया निश्येन शीलयन्ति तेषामविद्यादेः संसारबीजस्य विशरणाद्विनाशात्परब्रह्म गमयितृत्वाद्गर्भजन्मजरामरणा द्युपद्रवा वसादयितृत्वादुपनिषत्समाख्ययाऽप्यन्यकृतात्परं श्रेय इति ब्रह्मविद्योपनिदुच्यते।

ननु भवेदेवमुपनिषदारम्भो यदि विज्ञानस्यैव मोक्षसाधनत्वं भवेत्। न चैतदस्ति। कर्मणामपि मोक्षसाशनत्वावगमात्। अपाम सोमममृता अभूम। अक्षय्यं ह वै चातुर्मास्यसाजिनः सुकृतं भवतीत्यादिना। न त्वेतदस्ति लोक॥ क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते।

“ बुध्दियुक्तो जहातीह उभे सुकृतदुष्कृते। कर्मजं बुध्दियुक्ता हि फलं त्यक्त्वा मनीषिणः॥ ”

जन्मबन्ध विनिर्मुक्ताः पदं गच्छन्त्यनामयम्। सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि॥

ज्ञानं निश्रेयसं प्राहुवृध्दा निश्चयदर्शिनः। तस्माज्ज्ञाननेन शुध्देन मुच्यते सर्वपातकैः॥

एवं मृत्युं जायमानं विदित्वा ज्ञानेन विद्वांस्तेज अभ्येति नित्यम्।

न विद्यते ह्यन्यथा तस्य पन्थास्तं मत्वा कविरास्ते प्रसन्नः॥

क्षेत्रज्ञस्यरशवरज्ञा नाद्विशुध्दिः परमा मता। अयं तु परमो धर्मो यद्योगेनाऽऽत्मदर्शनम्॥

आत्मज्ञः शोकसंतीर्णो न बिभेति कुश्चन।मृत्योः सकाशानमरणादथवाऽन्य कृताद्भयात्॥

जायत ने म्रियते न बध्यो न च धातकः।न बध्यो बन्धकारि वा न मुक्तो न च मोक्षदः॥

तमेवं विद्वानमृत इह भवति नान्यः पन्था विद्यतेऽयनाय। न कर्मणा न प्रजया धनेन त्यागेनैक अमृतत्वमानशुः प्लवा ह्येते अद्दढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म। एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापियन्ति। नास्त्यकृतः कृतेन॥

कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते ।

तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥

अज्ञानमलपूर्णत्वात्पुराणो मलिनः स्मृतः ।

तत्क्षयाद्धि भवेन्मुक्ति र्नान्यथा कर्मकोटिभिः ॥

प्रजया कर्मणा मुक्तिर्धनेन च सतां न हि ।

त्यागेनैकेन मुक्तिः स्यात्तदभावे भ्रमन्त्यहो ॥ "[1]

कर्मोदयो कर्मफलानुरागास्तथा ऽनुयन्ति न तरन्ति मृत्युम्। ज्ञानेन विद्वांस्तेज अभ्येति नित्यं न विद्यते ह्यन्यथा तस्य पन्थाः ॥

एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते :-

श्रमार्थमाश्रमाश्चापि वर्णानां परमार्थतः ।

आश्रमैर्न च वेदैश्च यज्ञैः सांख्यैव्रतैस्तथा ॥

उग्रैस्तपोभिर्विविधै दानैर्नानाविधैरपि ।

न लभन्ते तमात्मानं लभन्तेऽज्ञानिनः स्वयम् ॥[२]

---

१ - श्वेताश्वतरेपनिषत् भुमिका २ - श्वेताश्वतरेपनिषत्

त्रयीधममधर्मार्थं किं । पाकफलसंनिभम् ।

नास्ति तात सुखं किंचिदत्र दुःखशताकुले ॥

तस्मान्मोक्षाय यतता कथं सेव्या मय त्रयी ।

अज्ञानपाशबद्धत्वादमुक्तः पुरुषः स्मृतः ॥[१]

ज्ञानात्तस्य निवृत्तिः स्यात्प्रकाशात्तमसो यथा ।

तस्माज्ज्ञानेन मुक्तिः स्यादज्ञानस्य परिक्षयात् ॥

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप ।

सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥[२]

श्रेयान्प्रशस्यतरः साक्षान्मोक्षफलाज्ज्ञानयज्ञ द्रव्यमयात्तदुपलक्षितताज् ज्ञानशून्यात्सर्वस्मादपि यज्ञात्संसारफलाज्ज्ञानयज्ञ एक एव । कस्मादेवं यस्मात्सर्वं कर्मेष्टिपशुसोमचयनरूपं श्रौतमखिलं निरवशेषं स्मार्तमुपासनादि रूपं च यत्कर्म तज्ज्ञाने ब्रह्मात्मैक्य साक्षात्कारे समाप्यते प्रतिबन्धक्षयद्वारेण पर्यवस्यति ।

तमेतं वेदानुवचनं ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाकेन । इति ।" श्रुतेः

---

१ः स्मृति ः

२ः श्रुतेः

पपमपनुदति । इति च श्रुतेः ॥

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ इति न्यायच्चेत्यर्थः।

तद्विद्धि प्रषिपातेन परिप्रश्नेन सेवया।

उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्वदर्शिनः ॥[१]

तत्सर्वकर्मफलफभूतं ज्ञानं विद्धि लभस्व। आचार्यनभिगम्य तेषां प्रणिपातेन प्रकर्षेन नीचैः पतनं प्रणिपातो दीर्धनमस्कारस्तेन। कोऽहं कथं बद्धोऽस्मि केनोपायेन मुच्येयमित्यादि परिप्रश्नेन। सेवया सर्वभावेन तदनुकूलकारितया एवं भ क्तिश्रद्धातिधयपूर्वकेणावनति विशेषेणाभिमखिाः सन्त उपदेक्ष्यन्ति

उपदेशेन संपादयिष्यन्ति ते तुभ्यं ज्ञान परमात्मविषयं साक्षान्मोक्षफलज्ञानिनः पदवाक्यन्यायादिमाना निपुणास्तत्वदर्शिनः कृतसाक्षात्काराः। साक्षात्कारवद्भिरुप-दिष्टमेव ज्ञानं फलपर्यवसायि न तु तद्रहितैः पदवाक्यमाननिपुणैरपीति भगवतो मतं -ः

---

१ः मधुसुदनि टीका गीता ।४ ।३४ । ॥

तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्॥ तत्रापि श्रोत्रियमधी तवेदं ब्रह्मनिष्ठं कृतब्रह्मसाक्षत्कारमिति व्याख्यानात्।बहुवचनं चेदमाचार्यविषयमेकस्मिन्नपि गैारवातिशयार्थं न तु बहुत्वविवक्षया । एकस्मादेव तत्वसाक्षात्कारवत् आचार्यतत्वज्ञानोदये सत्याचार्यान्तरगमनस्य तदर्थमयोगादिति द्रष्टव्यम्।

धर्माधर्मरूपं कर्म संसारफलम् अभिप्रतं मुमुक्षोः पापवत्पुण्यस्याप्यनिष्टत्वात् । तर्हि केनोपायेन मृत्योर्विनाश इत्याह -ः

एवं मृत्युं जायमाना विदित्वा ज्ञानेन तिष्ठन्न बिभेति मृत्योः।

विनश्यते विषये तस्य मृत्युर्मृत्यो यथा विषयं प्राप्य मर्त्यः॥[१]

एवं क्रोधादिरूपेण जायमानं प्रमादाख्यं मृत्युं जननमरणादि सर्वानर्थबीजं विदित्वा क्रोधादीन् दोषान् परित्यज्य अक्रोधादीन् संपाद्य ज्ञानेन चित्सदानंदाद्वितीय ब्रह्मात्मना तिष्ठन्न बिभेति मृत्योः। तथा च श्रुतिः आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति

---

१ - सुजातियम् ॥१६॥८८

कस्मात् पुनर्ज्ञानेन तिष्ठन्न बिभेति मृत्योरित्याह -ः

विनश्यते तस्य ज्ञानिनो विषये गोचरे परमात्मनि साक्षात्क्रियमाणे प्रमादाख्योऽज्ञानमृत्युः। यथा मृत्योर्विषयं संसारमागतो मृत्युनाऽभिभूतो नष्टो भवति मर्त्यः। एवमात्मवेदिनो विषयमागतो अज्ञानमृत्युर्नष्टो भवति।

उक्तं च ज्ञानमहोदधो।

ज्ञानसंस्थानसद्भावो ज्ञानाग्निर्ज्ञानवज्रभृत्।

मृत्यं हन्तीति विख्यातः स वीरो वीतमत्सर इति ॥[१]

यमं त्वेके इत्यत्र आत्मावसन्नमिति यमोऽप्यात्मनि कल्पित इत्युक्तं तद्व्याचष्टे -ः सक्रोधलोभाविति यस्त्वच्छीरे एषः अहम्यत्यविषयः अन्तरात्मा बाह्यात्मान। शरीरमपेक्ष्य अन्तरः चिदचिद्ग्रन्थिरूपा जीवः स मोहवान् अतस्मिंसतद् बुध्दिर्मोहः अनात्मनि देहादावात्मबुद्धिर्विपर्ययरूपं ज्ञान तद्वन् क्रोधलोभमत्यृरूपो वृति शुकनलिकान्यायेन स्वयं बन्धहीनोऽपि। अज्ञानास्वात्मानं बद्धं मन्यते तेन कामादिदोषवशो भवतीत्यर्थः। जायमानं मोहादिति शेषः। मोहविरोधिनि ज्ञाने

---

१ - ज्ञानमहोदधो

तिष्ठन्निष्ठावान् यमान्न बिभेति। तत्र दृष्टान्तः विषये गोचरे तस्य ज्ञानस्य मृत्युर्बन्धः विनश्यते मृत्यार्यमस्य मर्त्यः देहः अज्ञानकृतो बन्धो क्षानेनैव नशयति न च कर्मणेति इत्याशयः।

तथा च श्रुतिः  तथा ह मा वेद वैतस्य केचन कर्मणा लेकैानीयते नस्ले ये त्व भ्रूणहत्यया न साधुना कर्मणा भूयान् भवति नो एवासाधुना कामादीमान् न्निशीर्मानं त्वाष्ट्रमनम मरुन्मखिान् पतीत् शास्त्रवृकेन्यः प्रापच्छम् ॥[१]

यथैधासिं समिद्धो ऽग्निर्भस्मसात्कुरुतेऽर्जुन।

ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥[२]

यथैधांसि काष्ठानि समिद्धः प्रज्वलित अग्निः भस्मसात्कुरुते भस्मीभावं नयति। ज्ञानाग्निः सर्वकर्माणि पापानि पूण्यानि च  विशेषेण प्रारब्धफलभिन्नानि स्मसात्कुरुते तथा ततकारणाज्ञान विनाशयतीत्यर्थः॥

तदधिगम उत्तरपूर्वाधयोरश्लेषविनाशैा तद्व्यपदेशात्॥  याप्येवमसंश्लेषः पाते तु

पास्कर सूत्रे॥ अधिकारोऽनेकदेहारम्भकं बवत्प्रारब्धफलं कर्म तच्चोपासकानामेव यावद्भोगसमाप्ति तिष्ठन्ति। भोगध्चैकेन वेति न विशेषः

-----------------------------------------------------------------

१ - गीता ॥४॥३७॥

# चतुर्थो विरामः

# कर्ममीमांसा

कर्मणो महिमानमवलोक्य कश्चित् कश्चिन् मीमांसकाः ईश्वरस्य कर्मत्वेन स्वकिरोति । जैनानां बोध्दानां आचार्यैरपि अतएव ईश्वरं अस्वीकृत्य कर्म एव स्वीक्रियते । काचिद् जातिः कश्चिद् व्यक्ति वा स्व कृतस्य कर्मणः प्रतिक्रियाभिः रक्षितुम् आसक्तः भवति ।

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।

तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥[1]

ननु कर्मविषये किं कश्चित्संशयोऽप्यस्ति येन पुर्वैः पूर्वतरं कृतमित्यादिनिबध्नासि अस्त्येवेत्याह । नैास्थस्य निष्क्रियेष्वपि तटस्थक्षेषु गमनभ्रमदर्शनात्तथा दूराच्चक्षुःसनिकृष्टेषु गच्छत्स्वपि पुरुषेष्वगमनभ्रमदर्शनात् परमार्थतः किं कर्म किं वा परमार्थतोऽकर्मेति कवयो मेधाविनोऽप्यत्रास्मिनविषये मोहिता मोहं निर्णयासामर्थ्यं प्राप्ता अत्यन्तदुर्निरूपत्वा स्यादित्यर्थः । तत्तस्मात्तेतुभ्यमहं कर्म अकारप्रश्लेषणच्छदादकर्म च

---

१ - गीता ॥४॥१६॥

प्रवक्ष्यामि प्रकर्षेण संदेहोच्छेदेन वक्ष्यामि। यत्कर्माकर्मस्वरूपं ज्ञात्वा मोक्ष्यसे मुक्तो भविष्यस्यशुभात्संसारात्।

कर्मणोह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः।

अकर्मणश्च बोद्धव्यं गहना कर्मणो गति ॥[1]

ननु सर्वलोकप्रसिद्धत्वादहमेवैतज्जानामि देहेन्द्रियादिव्यापारः कर्म तूष्णीमासनमकर्मेति तत्र किं। त्वया वक्तव्यमिति।

हि यस्मात्कर्मणः शास्त्रविहितस्यापि तत्त्वं बोद्धव्यमस्ति विकर्मणश्च प्रतिषिद्धस्य अकर्मणश्च तूष्णीभावस्य। अत्र वाक्यत्रयेपि तत्त्वमस्तीत्याध्याहारः। यस्माद् गहना दुर्ज्ञाना । कर्मण इत्युपलक्षणं कर्माकर्मविकर्मणाम् गतिस्तत्त्वमित्यर्थः।

कर्मण्यकर्म यः पश्येदकर्मणि च कमर यः।

स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥[2]

कर्मणि देहेन्द्रियादिव्यापारे विहिते प्रतिषिद्धे चाह। करोमीति धर्मध्यासेनाऽऽत्मन्यरोपिये नैास्थेनाचलत्सु तटस्थवृक्षादिष्विव यः --

---

१ - गीता ॥१४॥१७

२ गीता ॥४॥१८

पश्येत्पश्यति। तथा देहेन्द्रियादिषु त्रिगुणमाया परिणामत्वेन सर्वदा सव्यापारेषु निर्व्यापारस्तूष्णीं सुखमास इत्यभिमानेन समारोपितेऽकर्मणिव्यापारोपरमे दूरस्थ चक्षुः सन्निकृष्ट पुरषेषु गच्छत्स्वप्यगमन इव सर्वदा सव्यापारदेहेन्द्रियादि स्वरूपपर्यालोचनेन वस्तु गत्या कर्म निवृत्याख्यप्रयत्नरूपं व्यापारं यः पश्येदुदाहृतपुरुषेषु गमनमिव ।

अत्र प्रथमपादेन कर्मविकर्मणोस्तत्त्वं कर्मशब्दस्य विहितप्रतिषिद्ध परत्वात् द्वितीयपादेन चाकर्मणस्तत्त्वं दर्शितमिति द्रष्टव्यम्। तत्र यावन्मन्यसे कर्मणो बन्धहेतुत्वातूष्णीमेव मया सुखेन स्थातव्यमिति तन्मृषा। असति कतृत्वाभिमाने विहितस्य प्रतिषिद्धस्य वा कर्मणो बन्ध हेत्वाभावात् ।तथा च व्याख्यातं न मां कर्माणि लिम्पन्तीत्यादिना। सति च कतृत्वाभिमाने तूष्णीमहमास इत्यौदासीन्याभिमाननात्मकं यत्कर्म तदपि बन्धहेतुवस्तुतत्वा परिज्ञानम्। तस्मात्कर्मविकर्माकर्मणां तत्त्वमीदृशं ज्ञात्वा विकर्माकर्मणि परित्यज्य कतृत्वाभिमान फलाभिसंधिहानेन विहितं कर्मैव कुर्वित्यभिप्रायः। अपरा व्याख्या कर्मणि ज्ञानकर्मणि दृश्ये जडे सद्रूपेण स्फुरणरूपेण चानुस्यूतं सर्वभ्रमाधिष्ठानमकर्मवेद्यं स्वप्रकाशचैतन्यं परमार्थदृष्टया यः पश्येत्। तथाऽकर्मणि च स्वप्रकाशे दृग्वस्तुनि कल्पितं कर्म दृश्यं मायामयं न परमार्थ सत् दृग्दृश्ययोः सम्बन्धानुपपत्तेः।[१] **मधुसूदनी टीका**

यस्तु सर्वाणि भूतानि आत्मन्येवानु पश्यति।

सर्वभूतेषु चाऽऽत्मानं ततो न विजुगुप्सते॥

एवं परस्पराध्यासेऽपि शुद्धं वस्तु यः पश्यति मनुष्येषु मध्ये स एव बुद्धिमान्नान्यः। अस्य परमार्थदर्शित्वादन्ययस्य चा परमार्थदर्शित्वात्। स च बुद्धिसाधनयोगयुक्तोऽन्तकरण शुद्धयैकाग्रचित्तः। अतः स एवान्तकरणशुद्धसाशनकृत्स्नकर्मकृदिति वास्तवधर्मैरेव स्तूयते।यस्मादेवं तस्मात्त्वमपि परमार्थदर्शी भव तावतैव कृतस्नकर्मकारित्वोपपत्तरित्यभिप्रायः।अतो यदुक्तं यज्ज्ञात्वा मन्यसेऽशुभादिति यच्चोकत। कर्मादीनां तत्त्वं बोद्धव्यमस्तीति स बुद्धिमानित्यादिस्तुतिश्च तत्सर्वं परमार्थदर्शने संगच्छते। अनयज्ञानादशुभात्संसारान्मोक्षा नुपपत्तेः। अतत्त्वं चान्यन्न बोद्धव्यं न वा तज्ज्ञाने बुद्धिमत्वमिति युक्तेव परमाथरदर्शिना व्याख्या। यत्तु व्याख्यानं कर्मणि नित्ये परमेश्वरार्थेभनुष्ठीयमाने बन्धहेतुत्वाभ ावादकर्मेदमिति यः पश्येत्। तथाऽकर्मणि च नित्याकर्माकरणे प्रत्यवायहेतुत्वेन कर्मेदमिति यः पश्येत्सबुद्धिमानित्यादि तदसंगतमेव। नित्यकर्मण्य कर्मेदमिति ज्ञानस्यशुभमोक्षहेतुत्वाभावात् मिथ्याज्ञानत्वेन बुद्धिमत्वादिस्तुत्यपपत्तिर्भ्रान्ततत्वात्। नित्यकर्मानुष्ठानं हि स्वरूपतोऽन्तः करण शुद्धिद्वारोपयुज्यते न तत्राकर्मबुद्धिः

– इति श्रुतिः कुत्राप्युपयुज्यते शास्त्रेण नामादिषु ब्रह्मदृष्टिवदवहितत्वात् नापीदमेव वाक्यं तद्विधायकमुपक्रमादिविरोधस्योक्तेः। एवं नित्यकर्माकरणमपि स्वरूपतो नित्यकर्मविरूद्धकर्मलक्षकतयोपयुज्यते प्र तु तत्र कर्मदृष्टिः क्वापयुजयते।

नापि नित्यकर्माकरणप्रत्यवायः अभाद् विोत्पत्ययोगात्। अन्यथा तदपि शेषेण सर्वदा कार्योत्पत्तिप्रसंगात् । भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैव ह्यर्थो विधीयत इति न्यायेन भावार्थस्यैवापूर्वजनकत्वात्। अतिरात्रे षोडशिनं न गृह्णाति ।

इत्यादावपि संकल्पविशेषस्यै वा पूर्वजनकत्वाभ्युपगमात् ने क्षेतोद्यन्तमादित्यम् इत्यादि प्रजापतिव्रतवत् । अतो नित्यकमरानुष्ठार्हे काले तद्विरुद्धतया यदुपवेशनादि कर्म तदेव नित्यकर्माकरणोपलक्षितं प्रत्यवायहेतुरिति वैदिकानां सिद्धान्तः।

अत्र एवाकुर्वन्विहितं कर्मेत्यत्र लक्षणाथ शता व्याख्यातः । लक्षणहेत्वोः क्रियायाः इत्यविशेषस्मरणेऽप्यत्र हेतुत्वानुपपत्तेः। तस्मान्मिथ्यादर्शनापनोदे प्रस्तुते मिथ्यादर्शन व्याख्यानं न शोभतेतराम् । नापि नित्यानुष्ठानपरमेवेतद् वाक्यं नित्यानुकुर्यादित्यर्थे कर्मण्यकर्म यः पश्येदित्यादि तदबोधकं वाक्यमुपयुञ्जानस्य भगवतः

प्रतारकत्वापत्तेरित्यादि भाष्य एव विस्तरेण व्याख्यातमित्युपरभ्यते। "ज्ञानमुत्पद्यते पुंसा क्षयात् पापस्य कर्मणः"[१]

इत्यादि स्मृतिषु स्पष्टमेव पापलक्षणसंस्कारद्वारा ज्ञानोत्पत्तौ कर्मणां विनियोगात्। यथा प्रोक्षणादीनि संस्कारकर्माणि- दर्शपूर्णमासस्वरूपोत्पत्तिहेतुतया स्वर्गे समुच्चीयन्ते तथा नित्यनैमित्तिक कर्माणि ज्ञानोत्पत्तिहेतुतया मोक्षे समुच्चूयन्ते।

ननु कर्माणां ज्ञानसाधनत्वे यावज्ज्ञानोदय। तदनुष्ठानाद्विविदिषां –सन्यासो न सिध्येदिति चेद् नः चित्तस्य शुद्धिद्वारा प्रत्यक् प्रवणतायां सम्पन्नायां तदनुष्ठानोपरमाङ्गीकाराविरोधात्।

तदुक्तम् :- प्रत्यक् प्रवणतां बुद्धेः कर्माण्युत्पाद्य शुद्धितः।

कृतार्थान्यस्तमायान्तिं प्रावृऽन्ते धना इव ॥[२] इति ॥

तदेवं संस्कारपक्षे कर्मणां ब्रह्मज्ञानोपयोगः सिद्धः।

---

१ - विवरण प्रमेय संग्रह

२ - विवरण प्रमेय संग्रह

## कर्मयोगः-

संन्यासिनस्तु कर्माणि परित्यज्य योगेनाध्यात्मिकमानन्दं प्राप्तुं प्रयतेरन्।इयमेव संन्यासस्य सर्वोच्चप्रगतिः। अस्यां स्थितौ संन्यासिनां सामाजिक जीवनस्य कर्मक्षेत्रे न भवेत् कोऽपि सम्बन्धः। कर्म कस्मात् त्याज्यम्। कर्मणः फलानि भोक्तुं संसारे जन्मग्रहण मवश्यम्भावीति कर्मणो बन्धन स्वभवो विज्ञातः अतएव कर्माणि परिहर्तव्यानि। कर्मणोऽकरणे मुक्तिर्भवति सुनिश्चितम्।

कर्मणः परित्यागेन मुक्तिलाभस्य योजना जैनबोद्धैरपि स्वीकृता।

उपर्युक्तकर्मसंन्यासस्यायेजनेन सह कर्मयोगस्य सिद्धान्तोऽपि पुरातन एव। कर्मफलाशां परित्यज्य यत् कर्म क्रियते न तद् बन्धनं भवति मोक्षस्य साधनमेव तद् भ वति। जनक कृष्णवसिष्ठव्यासादयः कर्मयोगिनः सन्ति। स्वयं संन्यासी भूत्वाऽपि शंकरो यावज्जीवनमनवरतश्रमेण भारतस्याभ्युदयाय यतते स्म । कर्मयोगस्य सिद्धान्तः प्रथममेव गीतायां सुविविक्तं वर्तते।

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ।

तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते ॥[1]

---

१ – गीता ५।२॥

यथा संन्यससिने जीवनपर्यन्तं कर्मव्यापारस्यावश्यकता न वर्तते तथैव कर्मयोगनिऽपि जविनपर्यन्तं कर्मणो विरमणं नापेक्षितम् ।

## कर्मयोगाधिकारिणः

साधारणपुरूषाः कर्मयोगाधिकारिणो न सन्ति । ते एव कर्मयोगिनो भ वितु । समर्था ये योगयुकता विशुद्धात्मानो विजितातमानो जितेन्द्रियाः सर्व -भूतात्मभ ूतात्मनश्च सन्ति । ईदृशानां पुरूषाणा । कर्मकरणमपि नैषकर्म्यमेव । न ते किंचिदपि

त्यकत्वा कर्म फलासङ्गं नित्यतृप्तो निराश्रयः ।

कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः ॥[1]

नैव किञ्चित् करोमीति युक्तो मन्येत् तत्त्ववित् ।

इन्द्रियाणिन्द्रियार्थेषु वर्तन्त इति धारयन् ॥[2]

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृह ॥

नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥[3]

---

१ – गीता ४ ।२० ॥

२– गीता ५ ।९ ॥

३– गीता १८ ।४९ ॥

**कर्मयोगिनो बुद्धिर्गीतायां विविक्ता :-**

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।

यः पश्यति तथात्मान मकर्तारं स पश्यति ॥[1]

मुक्तसंगोऽनहं वादी धृत्युत्साहसमन्वितः ।

सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्विक उच्यते ॥[2]

सर्व कर्माण्यपि सदा कुर्वाणो मद् व्यपाश्रयः ।

मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥ [3]

## कर्मयोगिनः कर्तव्याणि : -

कर्मयोगी तानी सर्वाणि कर्माणि प्र करोति यानि कश्चित् साधारणपुरुषोऽपि करोति। निस्सन्देहं तस्य शाश्वतकर्माणि यज्ञदानतपांसि भवन्ति। एभिस्तस्य चित्तशुद्धिर्भवति । वर्णधर्मानुरूपं तस्य कार्याणि भवन्ति । कर्मयोगिने कर्म भगवदर्चनस्य सामग्री भवति । स एव महादेवोऽर्चनीयो यस्मात् सर्वेषां प्राणीनां प्रवृत्तिर्जायते येन सर्वमिदं ततम् । इदमेव कर्मणो याज्ञिकस्वरूपम् । इदमेव मानवस्य सफलताया वास्तविकं रहस्यम् ।

---

१- गीता १३ ।२९ ॥

२- गीता १८ ।२६ ॥ ३- गीता १८ ।५६ ॥

गीतानुसारं मानवलोकोऽयं कर्मभूमिः। नात्र कर्मणः पूर्णरूपेण त्यागः सम्भाव्यं कर्मसंम्यासिनोऽपि कर्मणः सर्वथा न मुक्ताः । कर्मसंन्यासिकर्मयोगिनोरन्तरभियन्मात्रमेव भवति यत् संन्यासी स्वल्पतमं कर्म करोति। कर्मयोगी चाकिाधिकं कर्म कुर्वन् लोककल्याणं विदधाति । कृष्णस्तु स्वकीयां कर्मयोगप्रवृत्तिं निदर्शयन्नाह ।

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ।[१]

लोकसंग्रहणाय कर्मप्रवृत्तिरतिशयमपेक्षिता । लोकस्य रक्षणाय कर्मयोगी तादृशमेव प्रवर्तते यथेश्वरो लोकरक्षणाय कार्यपरः। ईश्वरादर्शानुरूपं हि समाजे सुव्यवस्थास्थापनं शानितविधानं चरित्रनिर्माणं च कर्मयोगिनां कर्तव्यानि।

कर्मयोगी समाजस्यादर्शनेता भवति । आत्मज्ञानेन यो जीवनपथः कर्मयोगिना प्रकाश्यते तस्यानुसरणं समाजः करोति। गीतायां कर्मयोगः संन्यासयोगो भक्तियोगश्च प्रतिष्ठिताः । एषु कर्मयोगः श्रेष्ठः। भक्तियोगेन संन्यासयोगेन च व्यक्तित्वस्य विकासं कृत्वापि निष्काम भावेन कर्मकरणमेवादर्शपथः। भारतीयसंस्कृतौ पदे पद देवानां

---

१ – गीता ३।२४॥

चरितमादर्शरूपेण- प्रतिष्ठितम्। देवानामादर्शानुकूलो वर्तते कर्मयोगः देवाः सदैव कर्माभिरताः स्वकीयं मानवीयं च कल्याणं कृतवन्तः।

**श्रीकृष्णेन कर्मयोगस्य वैशिष्ट्यं परिलक्ष्य गीतायां प्रतिपादितम् :- -**

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥[१]

---

१ - गीता ६।४६॥

# पंचमोविरामः

# भक्ति-मीमांसा

एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्।
एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्।।
एतदालम्बनँ श्रेष्ठमेतदालम्बनं परम्।
एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते।।[1]

वेदैकदेशा उपनिषदः। अनेनोपनिषदो भक्तिसाधनत्वेन साक्षाद्विर्नियुक्तास्त -पांसि कर्मणि शुद्धिद्वारेणवगतिसाधनानि। मन्दाधिकारिणो विचारसमर्थस्य क्रमेणवगति साधनं साक्षिप्याऽऽह।

एतद्ध्येवाक्षरं ब्रह्मापरमेतद्ध्येवाक्षरं परं च। तयोर्हि प्रतीकमेतदक्षरम्। एतद्ध्येवाक्षरं ज्ञात्वोपास्य ब्रह्मेति यो यदिच्छति परमपरं वा तस्य तद्भवति। परं चेज्ज्ञातव्यमपरं चेत्प्राप्तव्यम्।

तत्त्वविचारमधिकृतानामोङ्काशोपासनां विधाय तत्फलम् दर्शयन्नोङ्कारं स्तौतीत्याह। यत ओङ्कारो ब्रह्मवाचको ब्रह्मप्रतीकोऽत इत्यर्थः। एतदक्षरमपरं ब्रह्मवेत्यन्वयः। हृदयमत इत्यर्थे। एतदक्षरं परं ब्रह्मैव। चकारः परापरात्मकत्वसमुच्च्यार्थः। हि शब्दो वाचकत्व समुच्चययार्थः। अिवा प्रतीकपदेनैव वाचकत्वमुपलक्ष्य हिः वेदान्तेषु प्रणवस्य वाचकत्वप्रतीकत्वप्रसिद्धयर्थो व्याख्येयः। फलवचनं व्याचष्टे। हि शब्दो भवतीत्यत्रान्वेति।

---

1. कठोपनिषद्- 1/2/16-17

ननु परापरोपासनयोस्तत्प्राप्तिः फलामित्युक्तं चेत् सम्यगानं व्यर्थमित्याशङ्कयो -पासनाद्वयस्य फलविभागमाह परं चेतदालम्बनत्वेनोपास्यं सितिमिसि वा तदा ज्ञातव्यं सत्प्राप्तव्यम्। अपरं चेत्तदा प्राप्तव्यमेवेत्यदयाहारेण योज्यम्। अथवा तदालम्बनत्वेन स्थितं परं चोदिच्छति तदा तज्ज्ञातव्यं भवति अपरं चेत्तदालम्बनत्वेन स्थितमिच्छति तदा तत्प्राप्तव्यमेंव भवतित्यन्वयः।।[1]

एतदालम्बनमेतद्ब्रह्मप्राप्त्यालम्बनानां श्रेष्ठं प्रशस्यतमम् एतदा -लम्बनं परमपरं च परापरब्रह्मविषयत्वात्। एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते, परस्मिन्ब्रह्मण्यपरस्मिंश्च, ब्रह्म भूतो ब्रह्मवदुपास्यो भवतीत्यर्थः। साधनहीनायोपदेशोऽनर्थक इति मत्वोच्चावाच्यमवगति -साधपमुक्त्वा वक्तव्यस्व्यस्वरूपम् यत्पृष्टं तदभिधानायोप क्रमत इत्याह।

परपरप्राप्तिसाधनत्वादित्यर्थः। एवमुक्तप्रकारेण। एतच्छ्रेष्ठ -मित्यन्वयः। केषां मध्य इत्यपेक्षायामाहप्राप्यलम्बनानामिति गायत्र्यादीनां मध्य इत्यर्थः। परशब्दोऽपरस्या -प्युलक्षणार्थ इत्याह। ब्रह्मवै लोको ब्रह्मलोकस्तस्मिन्महीयते पूज्यो भवतीत्यर्थमाहः।।

आप्यान्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि सर्व ब्रह्मोपनिषदं माऽहं ब्रह्म निराकुर्या मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मे अस्तु, तदात्मनि निरले च

---

1. कठोपनिषत्, उप. भाष्यम्-पृ.-82/63

उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु।[1]

मम अङ्गानि हस्तपादादीनि वाक्प्राणः चक्षुः श्रोत्रं अथे अपि बलमिन्द्रियाणि सर्वाणि आप्यान्तु वर्धतामित्यर्थः। सर्वं ब्रह्मोपनिषदं इति पाठ सर्वं पूर्वोक्तमुपनिषत्प्रसिद्धब्रह्मवै न तद्वयसिरेकेण किञ्चितदस्ति। अहं ब्रह्म न निराकुर्याम-ब्रह्म नास्तीति न देयम् तथा वदने असन्नेव सम भवति असद् ब्रह्मेसि वेद चेत्-इति स्वस्याप्यसत्वापत्ते:।

मा मा ब्रह्म निराकरेत् पुरुषार्थद् भ्रशयेत् ब्रह्म तं परदाद्योऽन्यत्रात्मनस्सर्वं वेद इति मैत्रेयी ब्राह्मणोक्तरीत्या सर्वं ब्रह्मव्यासिरिक्तमिति यो मन्यने तं ब्रह्म पराकुर्यात् पुरुषार्थाद्भ्रंशयेदित्यर्थः।अनिराकरणमस्तु ब्राह्मणः सकाशाच्च मम सकाशाच्च इति पुनर्वचन -मादरार्थम्।

'' आत्मान-ँरथिनं विद्ध शरीर-ँरथमेव तु।

बुद्धिं तु सारथिं विद्धिं मनः प्रग्रहमेव च।।[2]

तमात्मानमृतपं संसारिणं रथिनं रथस्वामिनं विद्धि जानहि। शरीरं रथमेव तु रथबद्धहयस्थानीयैरिन्द्रिययैराकृष्णमाणत्वाच्छरीरस्य बृद्धिं तु अध्यवसयालक्षणा सारथिं विद्धि बुद्धिनुतृत्वप्रधानत्वाच्छरीरस्य साराथिनेतृत्वप्रधान इव रथः।

---

**1.**केनोपनिषद्-मंगलाचरणम

2.कठोपनिषद

तत्र य उपाधिकृत: संसारी विद्याविद्ययोरधिकृतो मोक्षगमनाय संसारगमनाय च तस्य तदुभयगमने साधनो रथ: कल्प्यते।

सर्वं हि देहगतं कार्यं बुद्धिकर्तव्यमेव प्रायेण। मन: सङ्कल्पविकल्पादिलक्षणं प्रग्रहं रशनां विद्धि। मनसा हि प्रगृहीतानि श्रोत्रादीनि करणानि प्रर्वतन्ते रशनयेवाश्वा:।।

रथरूपकवाक्यमवतारयति। जीवात्मपरमात्मनोर्मध्ये। उपाधिकृत उपाधिपरिच्छन्न इत्यर्थ:। ईश्वरं व्यावर्तयति। मुक्तजीवं व्यावर्तयति। साक्षात्कारकर्मणोरित्यर्थ:। कस्मैप्रयोजननायेत्यकाङ्क्षायामाह। विद्यायामधिकृतो मोक्ष- गमनायाविद्यायामधिकृत: संसार गमनायेति विभाग:। विद्याविद्ययोरधिकृतस्य तदुभय -गमनसाधन: संसारमोक्षगमनसाधन:। रथगमनागमनजन्मफलभोक्तृस्वामिसाम्यं निव -क्षित्वां तमाह।

शुद्धचैतन्यं व्यावर्तयति। ईश्वरं व्यावर्तयति। रथतादात्म्यभिमनिमित्यर्थ:। शरीरस्य रथत्वसाम्ये हेतुमाह। अन्त:करणस्यैक्येऽपि वृत्तिभेदेन भेदं विवक्षित्वा सारथिप्रग्रहकल्पेनत्याह। अध्यवसायलक्षणम्। अध्यवसायो निश्चयो लक्षणं रूवरूपं यस्या: सा ता मित्यर्थ:। पूर्ववत्साम्ये हेतुमाह। तत्र दृष्टान्तमाह--

सारथिर्नेता प्रापयतिा प्रधान: स्वतन्त्रोयस्य स इवेतयर्थ:। ननु मनआदीन्यपि शरीरनेतृणि तत्कथं बुद्धरेव नेतृत्वेन सारत्विमत आह। देहगतं सर्वं कार्य गमनागमनादि प्रायेण बृद्धया कर्तव्यं हि यस्मात्तस्मात्प्रायिकाभिप्रायेण बुद्धरेव नेतृत्वात्सारथिप्रग्रहशब्दित: मन इत्साह।

संकल्प इदमेंव करिष्य इति वेत्यादि:। आदिशब्देन किवल्पो गृह्यते स्थाणुवर्ज्ञ पुरुषो वेत्यादि: तत्स्वरूपमित्यर्थ:। तस्य रश्नात्वं प्रसिद्ध रशनासाम्येनोपादयति। प्रगृहीतान्यकृष्टामि। यथा सूत्रेणाश्वा आकृष्यन्ते तद्वदित्यर्थ:।

" इन्द्रियाणि हयानाहुर्विषया-ँस्तेषुगोचरान्।

आत्मेन्द्रियमनोयुक्तं भेक्तेत्याहुर्मनीषिण:।।[1]

इन्द्रियाणि चक्षुरादीनि हयानाहू रथकल्पनाकुशला: शरीरथाकर्षणसामान्यात्। तेष्वेवोन्द्रियेषु हयत्वेन परिकल्पतेष गोचरान्मार्गन्रूपादीन्विषयान्विद्धि।

आत्मेन्द्रिय मनोयुक्तं शरीरेन्द्रियमनोभि: स्वाहितं संयुक्तमात्मन: भोक्तोति संसारीत्याहुर्मनीषिणो विवेकिन:। न हि केवलस्याऽऽत्मनो भोक्तृत्वमस्ति बुद्धियाद्युपाधिकृतमेव तस्य भोक्तृत्वम्। तथा च श्रुत्युन्तरे केवलस्याभोक्तृत्वमेव दर्शयति--दयायतीव लेलायतीवेत्यादि। एवं च वक्ष्यमाणरथकल्पनयावैष्णवस्य पदस्याऽऽत्मतया प्रतिपत्ति -रूपपद्यते नान्यथा स्वभावानतिक्रमात।

प्रग्रहत्वसाराथिस्वाम्याधिष्ठितरथाकर्षकहयतुल्यानिन्द्रियाणित्याह।

---

1. कठोपनिषद

इत्याकङ्क्षया -माह। रथत्वेन शरीरं कल्पयन्ति निरूप्यन्ति येऽध्यात्मविदस्त इत्यर्थः। आकर्षणं हयधर्मस्तत्साम्यादित्यर्थः। यथा भद्रसेनस्यहयगन्तव्यमार्गो विषया इत्याह। आदिशब्देन स्पर्शकल्पितस्तस्य भोक्तृत्वं च न स्वाभाविकमित्याह।

उपाध्यपरिच्छिन्नस्येत्यर्थः। क्रशास्त्र मुदाहरति। ध्यायतीव लेलायतीवेत्यादि श्रुत्युन्तर मुपाध्यानवच्छिन्नस्या संसारित्वमेव दर्शयति न संसारित्वमित्यर्थः। वैष्णव प्रदप्राप्तिश्रुत्यनुपपत्याऽप्या स्वाभाविकसंसारित्व-मित्याह।

औपाधिके भोक्तृत्वे सतीत्यर्थः। वक्ष्यमाणा या रथ कल्पना विज्ञानसारथिस्त्वित्यादिना तया वैष्णवस्य पदस्य व्यापकस्वरूपस्याऽऽत्मतया प्रत्यगभिन्नत्वे प्रसिपत्तिः प्राप्तिरवस्थानमुपद्यत इत्यन्वयः। स्वभावस्य पारमार्थिकस्य संसारित्वस्यानतिक्रमादितिक्रमाभसावात्याभावादसंसारिवैष्णव-पदप्रार्प्तेत्यर्थः[1]

यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्देज्ञान आत्मनि।
ज्ञानमात्मानि महति नित्यच्छेतद्यच्छान्त आत्मनि।।[2]

**भाष्यम्ः--**

यच्देन्नियच्देदुपसंहरेत्प्राज्ञो विवेकी। किम्। वाग्वाच्यम्। वागत्रासेपलक्षणार्था सर्वेषामिन्द्रियाणम्। क्व। मनसी

---

1. भगवत्प्राप्त्यर्थ साधना स्वरूपम्-कठोपनिषद् 1/3/13
2. भगवत्प्राप्त्यर्थ साधना स्वरूपम्-कठोपनिषद् 1/3/13

मनसीतिच्छान्दसं दैहयर्सम। तच्च मनो यच्छेज्ज्ञाने प्रकाशश्वरूपे बुद्धावात्मनि। बुद्धुर्हि मनआदिकरणान्याप्नोतित्यात्मा प्रत्येकेषाम्। ज्ञानं बुद्धिमात्मनि महति प्रथमजे नियच्छेत्। प्रथमजवत्स्वच्छस्वभावकमात्मनो विज्ञानमापादयेदित्यर्थः। तं च महान्तमात्मनं यच्छेच्छान्ते सर्वविशेषप्रत्यस्तामितिरूपैऽविक्रिये सर्वान्तरे सर्वबुद्धिप्रत्ययसाक्षिणि मुख्य आत्मनि।।[1]

निदिध्यासनप्रचयेनैकाग्रयमापन्नमन्तः करणं यदा सहकारि सम्पाद्यते तदा तत्सहकृतान्तमहावाक्यदहं ब्रह्मस्मीति या बुद्धिवृत्तिरूत्पद्यते तस्याभिव्यक्तो ब्रह्मभाव इति स्वतोपरापेक्षतया व्यवहियत इति दृश्यत्वमुपचर्यते। यो हि यत्प्रयुक्तव्यवहारः स तद्दृश्य इति प्रसिद्धम्।

**ब्रह्मज्ञानसाधनत्वेनोत्तरं वाकयं व्याचष्टे**

तस्याऽऽत्मनः प्राप्तिस्तत्साधनीभूतं ज्ञानं तदुपायामित्यर्थः। ननूपसंहारेऽपि वाच इतरेन्द्रियाणां सव्यापाराणमनुपसंहारे तन्मात्रं न ज्ञानसाधनमित्याशङ्कयाह। आकाङ्क्षापूर्वकमधिकरणं निदर्शित। दैहर्यस्य गीतामाह। संकल्पविकल्पाप्मकमनसो बृद्धितन्त्रत्वात्तरस्य तस्यां भयस्य कर्तव्यात्या प्रकाशसामान्यं ज्ञान शब्देन मनआदिकरणव्याप्त्या तेषां प्रत्यगात्मा बुद्धि स्तच्छब्देनोच्चयत इत्याह। नन्वात्ममहच्छब्दाभ्यां व्यापक

---

1.उप.भा., पृ.56

प्रत्यगात्मनोऽभिधानात्कथं प्रथमजे हिरण्यगर्भे बुद्धौ व्यष्टि विशेषेणात्प्रत्यस्तमित –सर्वविशेषेणवत्येतस्य लयप्रतिपादनातस्य ग्रहणं न विरुध्यते। न च व्यष्टिबुद्धे समष्टौ लयः कथामितिवाच्यम् आत्महच्छ्णदाभ्यां सकारधससूत्रहैरण्यविज्ञानं प्रत्यगात्मोपधिभूताविज्ञज्ञनमापादयेदित्यर्थः। एवमुत्तरोत्तरं हेतुत्वेन व्याख्येयम्। मुक्ष्य आत्मनि तं यच्छेदित्यन्वयः।

'' उतिष्ठत जाग्रत प्राप्य वरान्निबोधत।

क्षुरस्य धारा निशिात दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति।।

उतिष्ठत हे जन्त्व आत्मज्ञज्ञनाभिमुखा भक्त जाग्रताज्ञाननिद्राय घोररूपायाः सर्वानर्थबीजभूतायाः क्षयं कुरुत। एवं पुरुषं आत्मनि तत् क्रियाकारकफललक्षणं नामरूपककर्मत्रयं यन्मिथ्याज्ञानविगृभ्भितं क्रियाकारकफललक्षणं स्वात्मयायात्मज्ञानेन मरीचिरज्जुगमनस्वरूप –दर्शननेर्नव स्वस्थः प्रशान्तात्मा कृतकृत्यो भवति। यतोऽस्तस्त –द्दर्शननार्थमनाद्यविद्याप्रसुप्ता कथम्।

प्राव्योपगगम्यम् वरान्प्रकृष्टानाचार्यस्तद्विदस्तुदुपदिष्टं सर्वान्तर-- मात्मनमहमस्मीति निषेधतावगच्छत। न ह्युपेक्षितव्यमिति श्रुतिरनु- कम्प्याऽऽहमातृवत् अतिसूक्ष्म्बुद्धिविषयाज्ज्ञेस्य। किमिव सूक्ष्मीकृता दुरत्या। यथा स पद्भ्यां दुगमनीयर तथा दुर्गं दुःखसम्पाद्यमित्येत्पथः पन्थानं तत्वज्ञानलक्षणं मार्ग कवयो मेधाविनो वदन्ति। ज्ञेयस्यातिसूक्ष्मत्वात्तद्विषय ज्ञानमार्गस्य दुःखसम्पाद्यत्वं वदन्तीत्यभिप्रायः।।

विषयदोषदर्शनेन ब्राह्मान्त:करणव्यापारप्रविलापनेतत्कर्तक: क: पुरुषार्थ: सेत्स्यतीत्याशङ्कयाऽऽह एवं एच्छेदित्याक्रमेण प्रत्यगात्मस्वरूपसाक्षात्कारेण समस्तं प्रकर्षेण विलाप्य कृतकृत्यो भवतीत्यन्वय:। आत्मव्यावृत्तयर्थं सर्वं विशिनष्टि। शब्दार्थक्रियात्रमित्यार्थ:। तस्य सत्यत्वं व्यावर्तयति। मिथ्या च तदज्ञानं च मिथ्याज्ञानं तेन विजृम्भितं निष्पादितं यत्तात्सर्वमित्यन्वय: ज्ञानफलं न कर्मसाध्यमिति ज्ञापुयितुं कर्मफलं संसारान्तर्गतमेवेति दर्शरूति। सम्यगानेन सर्वविलापने कृतकृत्यतेत्यत्र दृष्टान्तमाह--

मरीच्यादिदर्शनेन तदुदकादि प्रविलप्य लौकिक: पुामन्यथा स्वस्थस्तथा स्वस्थ: सर्वब्राह्मान्द्रियव्यापाररहित: प्रशात्मा आत्माऽन्करणं यस्य सर्वमनोव्यापाररहित: प्रशात्मा कर्तव्याभावात्कृतकृत्यो भवन्तीत्यर्थ:।[1]

---

1.उपभाष्य, पृ.-100